| अथ महापातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णिदानम्। | दक्षिणा। |
|---|---|---|---|---|
| कामतस्तद्वधः। | तद्द्विगुणम्। | तद्द्विगुणम्। | तद्द्विगुणम्। | तद्द्विगुणम्। |
| अकामतो वैश्यकर्त्तृकब्रह्मवधः। | ब्राह्मण कर्त्तृकवधप्रायश्चित्तत्रिगुणम्। तत्र ३६ वार्षिकव्रतम्। | ५४० धेनवः। | १६२० कार्षापणाः। | ३०० गावः। अशक्तौ ३०० कार्षापणाः। |
| कामतो वैश्यकर्त्तृकब्रह्मवधः। | ७२ वार्षिकव्रतम्। | १०८० धेनवः। | ३२४० कार्षापणाः। | ६०० गावः। अशक्तौ ६०० कार्षापणाः। |
| अकामतः शूद्रकर्त्तृकब्रह्मवधः। | ब्राह्मणकर्त्तृकवधप्रायश्चित्तचतुर्गुणम्। तत्र ४८ वार्षिकव्रतम्। | ७२० धेनवः। | २१६० कार्षापणाः। | ४०० गावः। अशक्तौ ४०० कार्षापणाः। |
| कामतस्तद्वधः। | तद्द्विगुणम्। | तद्द्विगुणम्। | तद्द्विगुणम्। | तद्द्विगुणम्। |
| अकामतो ब्राह्मणकर्त्तृकब्राह्मणीवधः। | ब्रह्मवधप्रायश्चित्तार्द्धम्। तत्र ६ वार्षिकव्रतम्। | ९० धेनवः। | २७० कार्षापणाः। | ५० गावः। अशक्तौ ५० कार्षापणाः। |
| कामतस्तद्वधः। | तद्द्विगुणम्। क्षत्रियस्य ब्राह्मणीवधे ब्राह्मणकर्त्तृकवधप्रायश्चित्त-द्विगुणम्। वैश्यस्य त्रिगुणम्। शूद्रस्य चतुर्गुणम्। अनेकब्राह्मणवधे प्रायश्चित्तस्यैकत्वम्। यदेव साक्षाद्धकर्त्तुः प्रायश्चित्तं तदेव स्वल्पप्रहर्त्तुरनुग्राहकस्य अप्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य च पादहीनम्। वध्यप्रतिरोधकस्य अनुग्राहकस्य प्रवृत्त-प्रवर्त्तकरूपप्रयोजकस्य च अर्द्धम्। अनुमन्तुर्निमित्तिनश्च पादः। अशक्तौ स्त्रीबालवृद्धानां सर्व्वत्रार्द्धम्। | तद्द्विगुणम्। | तद्द्विगुणम्। | तद्द्विगुणम्। |
| ज्ञानतो ब्राह्मणस्य पैष्टीसुरापानम्। हिरण्यस्तगौड़ीमाध्वीपानञ्च। | अग्निसमस्पर्शानां सुरागोमूत्रजलदुग्धघृतगोमयरसानामन्यतमस्यामरणात् पानम्। चतुर्विंशतिवार्षिकव्रतं वा। | ३६० धेनवः। | १०८० कार्षापणाः। तन्मूल्य-स्वर्णादि वा। | २०० गावः। अशक्तौ २०० कार्षापणाः। |
| अज्ञानतो ब्राह्मणस्य तासां पानम्। | एतदर्द्धम्। तत्तु द्वादशवार्षिकव्रतम्। | १८० धेनवः। | ५४० कार्षापणाः। तन्मूल्य-स्वर्णादि वा। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| अज्ञानतः क्षत्रियस्य पैष्टीसुरापानम्। | नववार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम्। | १३५ धेनवः। | ४०५ कार्षापणाः। तन्मूल्य-स्वर्णादि वा। | ७५ गावः। अशक्तौ ७५ कार्षापणाः। |
| अज्ञानतो वैश्यस्य पैष्टीसुरापानम्। | षाड्वार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम् स्त्रीबालवृद्धानामर्द्धादिकम्। | ९० धेनवः। | २७० कार्षापणाः। तन्मूल्य-स्वर्णादि वा। | ५० गावः। अशक्तौ ५० कार्षापणाः। |
| अज्ञानतो ब्राह्मणकर्त्तृकब्राह्मणस्वामिकाशीतिरक्तिकापरिमितसुवर्णस्तेयम्। | अपहृतद्रव्यं तस्यानुरूपं मूल्यं वा स्वामिने दत्त्वा द्वादशवार्षिकव्रतं करणीयम्। | १८० धेनवः। | ५४० कार्षापणाः। तन्मूल्य-स्वर्णादि वा। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| ज्ञानतस्तत्कर्त्तृकतत्स्तेयम्। | एतद्द्विगुणं २४ वार्षिकव्रतम्। गुणवद्ब्राह्मणकर्त्तृके तु सर्व्वत्रार्द्धम्। | ३६० धेनवः। | १०८० कार्षापणाः। | २०० गावः। अशक्तौ २०० कार्षापणाः। |
| ज्ञानतः क्षत्रियवैश्यशूद्रकर्त्तृकब्राह्मणस्वामिकाशीतिरक्तिकापरिमितसुवर्णस्तेयम्। | राजकर्त्तृकमुषलाघातेन मरणम्। चतुर्विंशतिवार्षिकव्रतं वा। | ३६० धेनवः। | १०८० कार्षापणाः। तन्मूल्य-स्वर्णादि वा। | २०० गावः। अशक्तौ २०० कार्षापणाः। |